# संस्कृतवार्ता:

दिनाङ्क : 24/02/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>आदौ मुख्यवार्ताः</u>

- प्रधानमन्त्री नरेन्द्रमोदी अद्य उक्तवान् यत् सर्वकारः भारतम् आत्मनिर्भरं कर्तुं सततं विकासपथे कार्यरतः अस्ति । अर्थव्यवस्थायां लघूद्योगाः महत्त्वपूर्णां भूमिकाम् आवहन्ति।
- राष्ट्रपति-भवने भारतीय-राजस्व-सेवाया: प्रशिक्षु-अधिकारिण: सम्बोधयन्ती राष्ट्रपति: प्रोक्तवती यत् विकासस्य स्थायित्वं समावेशित्वं च कर्तुं संसाधनानाम् प्रबन्धनं कुशलतापूर्वकं निष्पक्षतया च करणीयम्।
- महाराष्ट्रस्य खाद्य-आपूर्तिमन्त्री अथ च नागरिकसुरक्षामन्त्री धनञ्जयमुण्डे स्वस्य त्यागपत्रं मुख्यमन्त्रिणे देवेन्द्रफडनवीसाय समर्पितवान्।
- जिनेवा-नगर मानवाधिकार-परिषदः वैश्विकसंसूचनासंदर्भे संयुक्त राष्ट्र मानवाधिकारस्य प्रमुखस्य वोल्कर-तुर्क इत्यस्य टिप्पणी दृढतया भारतेन निरस्तीकृता।
- संयुक्तराज्यामेरिकादेशे देशस्य द्वितीये बृहत्तमे राज्ये टेक्सस्-नगरे प्रायः षष्टि-अधिक-एकशतं खसरा-प्रकरणानि सूचितानि ।

-----------------------------------

<u>प्रधानमन्त्री दृश्यश्रव्यप्रणाल्या संवादः</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य उक्तवान् यत् सर्वकारः भारतम् आत्मनिर्भरं कर्तुं सततं विकासपथे कार्यरतः अस्ति अधुना च एतदर्थं परिष्कारेषु तीव्रता आनीयते । तेनोक्तं देशेन गतदशवर्षेषु स्वप्रतिबद्धता परिष्कारान् प्रति आर्थिकानुशासनं प्रति पारदर्शितां च प्रति दर्शिता अस्ति। लघूद्योगानां विषये चर्चयता श्रीमोदिना उक्तं यत् अर्थव्यवस्थायां एते उद्योगाः महत्त्वपूर्णां भूमिकाम् आवहन्ति । प्रधानमन्त्री दृश्यश्रव्यमाध्यमेन वित्तसंकल्पनापत्रानन्तरं लघूद्योगानां विषये भाषमाणः आसीत् ।

व्यापारसरलीकरणसन्दर्भे सर्वकारस्य पदक्रमाणां विषये चर्चयता श्रीमोदिना उक्तं यत् वित्तसंकल्पनापत्रे निर्माणस्य तथा च निर्यातस्य सन्दर्भे महत्त्वपूर्णाः पदक्रमाः उत्थापिताः सन्ति ।

प्रधानमन्त्री उक्तवान् यत् शोधः विकासश्च भारतस्य निर्माणाभिक्षमतायां महत्त्वपूर्णां भूमिकाम् आवहति। आधुनिकक्रीडनकानां पादत्राणानां तथा च चर्मोद्योगानां क्षेत्रे भारतस्य क्षमतां विश्वं सम्यक्तया परिचिनोति ।

तेन एतेषु उद्योगेषु अग्रगण्याः निवेदिताः यत् ते केवलं दर्शकभूताः मा भवेयुः अपितु वैश्विक-आपूर्तिक्षेत्रे अवसरान् पश्येयुः । प्रधानमन्त्रिणा प्रोक्तं यत् अधुना मुख्यतया क्रियात्मक-उत्पादानां निर्माणे एव अवधानं भविष्यति येषां वैश्विकस्तरे अभियाचनं वर्तते। पीएल् आई प्रोडक्श्न् लिंकड् इंसेटिव इति योजनायाः अन्तर्गतं पञ्चाशत्सहस्रकोटिरूप्यकाणां निवेशः सञ्जातः अस्ति तथा च त्रयोदशलक्षकोटिरूप्यकाणां उत्पादनं सञ्जातम् अस्ति ।

-----------------------------------

<u>राजस्व अधिकारी</u>

अद्य राष्ट्रपति-भवने भारतीय-राजस्व-सेवाया: प्रशिक्षु-अधिकारिण: सम्बोधयन् राष्ट्रपति: प्रोक्तवती यत्। विकासस्य स्थायित्वं समावेशित्वं च कर्तुं संसाधनानाम् प्रबन्धनं कुशलतापूर्वकं निष्पक्षतया च करणीयम्। सा प्रोक्तवती यत् देशस्य मूलसंरचना वर्धमाना अस्ति। प्राविधिक-सम्पर्क: दूरतां न्यूनी करोति आर्थिक-अवसराः च पूर्वापेक्षया अधिकतया सुलभाः सन्ति।

<u>महाराष्ट्रमन्त्रिणः त्यागपत्रम्</u>

महाराष्ट्रस्य खाद्य-आपूर्तिमन्त्री अथ च नागरिकसुरक्षामन्त्री धनञ्जयमुण्डे स्वस्य त्यागपत्रं मुख्यमन्त्रिणे देवेन्द्रफडनवीसाय समर्पितवान्। वार्ताहरैः सह संवादे फडनवीसः उक्तवान् यत् तेन श्रीमतः मुण्डे इत्यस्य त्यागपत्रं स्वीकृतम् अस्ति।

अस्य त्यागपत्रस्य पृष्ठतः श्रीमतः मुण्डे इत्यस्य सहयोगिनः सन्तोषदेशमुखस्य हत्यायां संलिप्तता अस्ति । विपक्षिदलानां सदस्याः भाजपायाः च विधायकः श्रीसुरेशः मुण्डे इत्यस्य त्यागपत्रं वाञ्छन्ति स्म ।

------------------------------------

यूएन-मानवाधिकार परिषद।

जिनेवा-नगर मानवाधिकार-परिषदः वैश्विकसंसूचनासंदर्भे संयुक्त राष्ट्र मानवाधिकारस्य प्रमुखस्य वोल्कर-तुर्क इत्यस्य टिप्पणी दृढतया भारतेन निरस्तीकृता। जिनेवा-नगरे संयुक्त राष्ट्रसंघस्य भारतस्य स्थायीप्रतिनिधि: श्री अरिंदमबाग्ची इत्ययं टिप्पणी निराधारा वर्तते इति प्रोक्तवान्। स: प्रोक्तवान् यत् एषा भूतलस्य वास्तविकतां न प्रतिबिम्बयति। असौ प्रोक्तवान् यत् भारतं विश्वस्य बृहत्तम-लोकतन्त्रयुक्तः देश: अस्ति।

श्री बाग्ची वर्य: जम्मू-कश्मीरस्य उच्च-मतदान-प्रतिशतं, वर्धमानं पर्यटनं, द्रुत-विकासं च सबलं प्रतिपादितवान् ।

संयुक्तराष्ट्रसंघस्य प्रतिवेदनस्य अति सरलीकरणविषये, विषयाणां चयनविषये च भारतं चिन्तां प्रकटितवत्।

------------------------------------

यूएसए-रूस-यूक्रेन

अमरीकीयः राष्ट्रपति: डोनाल्ड ट्रम्प इत्यनेन यूक्रेनस्य सैन्यसहायता निरस्तीकृता। व्हाइट-हाउस इत्यस्य एक: अधिकारी-वार्ताहारै: सह अवदत् यत् राष्ट्रपति: ट्रम्प स्पष्टीकृतवान् यत् अमरीका-देश: शान्ति-विषये केन्द्रित: अस्ति। तस्य सहयोगिन: अपि तस्मिन् लक्ष्ये प्रतिबद्धा: भवेयु इति। अमरीका-देश: साहाय्यस्य विरामं कृत्वा समीक्षां कुर्वन् अस्ति यत् समाधाने कथं योगदानं भवेत् इति सुनिश्चितं क्रियते। एष: पदक्षेप: यूक्रेन-देशस्य राष्ट्रपति: वोलोदिमीर जेलेंस्की, अमरीका देशस्य राष्ट्रपति: डोनाल्ड ट्रम्प च मध्ये तस्य उपनिदेशक: च मध्ये आश्चर्यजनकस्य सार्वजनिक-विवादस्य केवलं दिवसाभ्यन्तरे एव कृत:।

एतेन घटनाक्रमेण यूक्रेनदेशे रूस-देशेन सह शान्तिवार्तायां सहमतिं कर्तुं बलं वर्धते इति अपेक्षा अस्ति।

------------------------------------

राजनाथ सिंह:

रक्षा-मन्त्री-राजनाथसिंह: प्रोक्तवान् यत् विविधबिध युद्धानि अन्तरिक्ष आधारित-हस्तक्षेपा: अपरम्परागत-संकटा: च सुरक्षा तन्त्राय आह्वानं जनयन्ति। स: प्रोक्तवान् यत् आन्तरिक-बाह्यसुरक्षाया: अतिव्याप्ते: कारणात् विश्वे सुरक्षा स्थिति: अधिकाधिकं आह्वानपूर्वकम् अभवत्। अद्य नवदिल्ल्यां आन्तरिकसुरक्षाया: उन्नत-प्रौद्यौगिकी-विषये उपवेशनं सम्बोधित्वा असौ उक्तवान् यत् विद्रोहेण वामपक्षीय उग्रवादेन आतङ्कवादेन च प्रभावितानां क्षेत्राणां स्वस्य भिन्ना: समस्या: वर्तन्ते।

स: समस्यासु विशिष्ट ध्यानं दातुं बलं दत्तवान्।

-----------------------------------

संयुक्तराज्यामेरिकादेशे

संयुक्तराज्यामेरिकादेशे देशस्य द्वितीये बृहत्तमे राज्ये टेक्सस्-नगरे प्रायः षष्टि अधिकैकशतं खसरा-प्रकरणानि सूचितानि । अस्य प्रकोपः मासान् यावत् भवितुम् अर्हति इति राज्यस्य स्वास्थ्य-अधिकारिणः अवधानं दत्तवन्तः।

।। इति वार्ता:।।